रोल नं. | | | | | | | | |

मुद्रित पृष्ठों की संख्या : 9

**028** **प्रतिदर्श प्रश्नपत्रम्** **228 (HHF)**

**2026**

# संस्कृतम्

**अवधि : होरात्रयम्।** **पूर्णांक : 80**

**निर्देश :** (i) अस्मिन् प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

(ii) उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।

(iii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एकस्मिन्नेव स्थाने लेखनीयानि।

(iv) प्रश्नपत्रं उत्तराणि न लेखनीयानि।

(v) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(vi) खण्डसंख्या अपि लेखनीया।

## खण्ड 'क' (अपठितांश – अवबोधनम्)

1. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

गङ्गा भारतस्य सर्वासु नदीषु पवित्रतमा श्रेष्ठा च नदी अस्ति। इयं हिमालस्य गङ्गोत्री–स्थानात् निर्गच्छति। तदा अस्याः स्त्रोतः लघु भवति। पश्चात् अनेके निर्झराः अस्यां नद्याम् आमिलन्ति, यैः गङ्गायाः जलस्य प्रवाहः तीव्रः भवति। पर्वतस्य प्रान्तेभ्यः निःसृत्य गङ्गा हरिद्वारनामके स्थाने समतलं भूभागं प्रविशति। तत्र हरिद्वारतीर्थे प्रतिवर्ष लक्षाणि पुरुषाः गच्छन्ति, गङ्गायाः शीतले जले स्नानं कुर्वन्ति। ते अमृतसमं जलं पीत्वा सुखम् अनुभवन्ति।

(क) एकपदेन उत्तरत – 1x2=2

(i) गङ्गा भारतस्य कीदृशी नदी अस्ति?

(ii) कुतः निःसृत्य गङ्गा हरिद्वारनामके स्थाने समतलं भूभागं प्रविशति?

(ख) पूर्णवाक्येन उत्तरत – 1

(i) हरिद्वारतीर्थे प्रतिवर्ष जनाः किं कुर्वन्ति?

(ग) निर्देशानुसारम् उत्तरत – 1x2=2

(i) गद्यांशात् 'विशालः' इति पदस्य विलोमपदं चित्वा लिखत।

(ii) 'तदा अस्याः स्त्रोतः लघु भवति' अत्र क्रियापदं किम्?

2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

विवाहे सञ्जाते कन्याः गृहस्थाश्रमं प्रविशन्ति। यदि पुरुषो विद्वान् स्त्री च विद्याशून्या भवति तर्हि तयोः दाम्पत्यजीवनं सुखकर न भवति। विद्याया अभावात् स्त्री स्वकीयं कर्त्तव्यं न जानाति, अत एव बहवः रोगाः व्याधश्यश्च तत्र स्थानं कुर्वन्ति। अतः स्त्रीणामपि शिक्षा पुत्राणां शिक्षावदेव आवश्यकीया वर्तते। बालिकानां शिक्षा बालकैः सहैव स्यात्, पृथग् वा इत्येष विषयः साम्प्रतं अपि विवादस्पदमेवास्ति। स्त्रीशिक्षायाः भारते प्रथमं बहुविरोधोऽभवत्। साम्प्रतं समाप्तप्राय एव। स्त्रीशिक्षायाः हानयोऽपि दृश्यन्ते, तासां परिमार्जनं कर्त्तव्यम्।

(क) एकपदेन उत्तरत – 1x2=2

(i) स्त्री स्वकीयं कर्त्तव्यं न जानाति, कस्याः अभावात्?

(ii) साम्प्रयं कः समाप्तप्रायः?

(ख) पूर्णवाक्येन उत्तरत – 1x2=2

(i) कयो दाम्पत्यजीवनं सुखकर न भवति?

(ii) कुत्र बहवः रोगाः व्याधयश्च स्थानं कुर्वन्ति?

(ग) निर्देशानुसारम् उत्तरत – 1x2=2

(i) 'स्त्री च विद्याशून्या' अत्र विशेषणपदं किम्?

(ii) 'विवाहे सञ्जाते कन्याः गृहस्थाश्रमं प्रविशन्ति' अत्र कर्तृपदं किम्?

(घ) अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत। 1

## खण्ड 'ख' (रचनात्मकं लेखनम्)

3. आपदाग्रस्तग्रामे सहायतार्थं मुख्यमन्त्रिणं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तैः शब्दैः पूरयित्वा उत्तरपुस्तिकायां लिखत– 1x4=4

सेवायाम्,

माननीयाः मुख्यमन्त्री महोदयाः

उत्तराखण्ड शासनम्, देहरादूनम्।

महोदय!

सविनयं .... यत् मम जनपदे .... महती आपदा आगता। मम ग्रामः अपि आपदाग्रस्तः जातः। जनानां भवनानि .... जातानि। महति जनधनहानिः अपि अभवत्। कृपया शासकीय सहायतया .... सहाय्यं कुर्वन्तु। महती कृपा भविष्यति।

भवदीयः
समस्त ग्रामजनाः
क ख ग
उत्तरकाशी

| |
|---|
| **मञ्जूषा – अतिवृष्टिकारणात्, ग्राम्यजनानां, निवेद्यते, ध्वस्तानि** |

4. मञ्जूषातः शब्दचयनं कृत्वा निम्नांकितं संवादं पूरयित्वा लिखत – 1x4=4

सुदेशः – भारतम् अस्माकं राष्ट्रम् ... सर्वे भारतीयाः।

रमा – शोभनम्, .... इयं भारतभूमिः।

सुदेशः – .... मुकुटरिव शोभते।

रमा – सागरः .... चरणौ प्रक्षालयति।

| |
|---|
| **मञ्जूषा – स्वर्गतुल्या, अस्याः, वयं, हिमालयः** |

**5.** 'भारतीयः कृषकः' इति विषयम् अधिकृत्य निम्नांकितशब्दसूचीतः चत्वारि वाक्यानि लिखत – 2x4=8

| |
|---|
| **मञ्जूषा – कृषिप्रधानः, परिश्रमी, स्वाभिमानी, वर्षा, अन्नदाता** |

## खण्ड 'ग' (अनुप्रयुक्त व्याकरणम्)

**6.** अधोलिखितेषु रेखाङ्कितपदेषु सन्धिं/सन्धि–विच्छेदं प्रदत्त विकल्पेभ्यः उचितं विकल्पं चित्वा लिखत– 1x3=3

(क) परिश्रमेण <u>भाग्योदयः</u> भवति।

(i) भाग्यो + दयः (ii) भो + उदयः

(iii) भाग्य + उदयः (iv) भाग्यः + उदयः

(ख) एकं <u>अनु+छेदं</u> लिखत–

(i) अनुछेदं (ii) अनुच्छेदं

(iii) अनुश्छेदं (iv) अनुष्छेदं

(ग) <u>सदाचारः</u> परमं धनम्।

(i) सद् + आचारः (ii) सदा + चारः

(iii) सद + अचारः (iv) सत् + आचारः

**7**. अधोलिखितेषु रेखाङ्कितपदेषु समासं/समास विग्रहं प्रदत्त विकल्पेभ्यः उचितं विकल्पं चित्वा लिखत– 1x3=3

(क) लक्ष्मणः <u>सरामं</u> वनं गच्छति।

(i) रामं सहितम् (ii) रामेण सहितम्

(iii) रामाय सहितम् (iv) रामस्य सहितम्

(ख) राजा <u>युद्धनिपुणः</u> वर्तते।

(i) युद्धे निपुणः (ii) युद्धं निपुणः?

(iii) युद्धस्य निपुणः (iv) शक्तिमान्

(ग) <u>बालकः च बालकः च</u> विद्यालयं गच्छतः।

(i) बालबालौ (ii) बालकाः

(iii) छात्राः (iv) बालकौ

**8.** अधोलिखितेषु रेखाङ्कितपदेषु प्रकृति–प्रत्ययौ संयोज्य प्रदत्तविकल्पेभ्यः उचितं विकल्पं चित्वा लिखत– 1x3=3

(क) इदं समाचार–पत्रं <u>सप्ताह + ठक्</u> अस्ति–

(i) सप्ताहठक् (ii) साप्तिक

(iii) साप्ताहिक (iv) सप्ताहिक

(ख) <u>नायिका</u> अभिनयं करोति –

(i) नायक् + ङीप् (ii) नायक+इका

(iii) नायक+टाप् (iv) नायक+इन्

(ग) भवान् तु <u>पूजनीयः</u>।

(i) पूज्+अनीयर् (ii) पूजा+नीय

(iii) पूज्+ङीप् (iv) पूज्+अनीयर्

9. अधोलिखितेषु रिक्तस्थानेषु प्रदत्तविकल्पेभ्यः उचितं अव्ययपदं चित्वा लिखत– 1x3=3

(क) यावत् अहम् आगच्छामि.............. अत्र तिष्ठ–

(i) अत्र (ii) तत्र

(iii) इतः (iv) तावत्

(ख) अद्य सोमवासरः .............. मंगलवासरः भविष्यति।

(i) ह्यः (ii) श्वः

(iii) अद्य (iv) तदा

(ग) .............. रात्रिकालोऽस्ति–

(i) अधुना (ii) अत्र

(iii) इतः (iv) अति

10. अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखत– 1x3=3

(क) बालिकया सुलेखं लिख्यते।

(ख) तेन ग्रामः गम्यते।

(ग) रामेण पठ्यते।

11. घटिकां दृष्ट्वा संस्कृतपदेषु समयं लिखत, राधिका कदा किं करोति– 1x4=4

(क) (ख) (ग) (घ)






(क) सा प्रातः ...................... वादने उत्तिष्ठति।

(ख) सा ...................... वादने योगाभ्यासं करोति।

(ग) राधिका ....................... वादने विद्यालयं गच्छति।

(घ) सा सायं ........................ वादने गृहं प्रत्यागच्छति।

12. अधोलिखितयोः वाक्ययोः अङ्कानां स्थाने संख्यावाचक–विशेषणैः रिक्तस्थानपूर्ति संस्कृतेन कृत्वा उत्तरपुस्तिकायां लिखत– 1x2=2

(क) उद्याने (4) .......................... बालिकाः भ्रमन्ति।

(ख) मम कक्षायां (60) .......................... छात्राः सन्ति।

13. अधोलिखितेषु वाक्येषु रेखाङ्कितानि पदानि शुद्धानि कृत्वा पूर्णवाक्यं उत्तरपुस्तिकायां लिखत– 1x3=3

(क) वयं सदा सत्यं <u>वदावः</u>।

(ख) मार्गे <u>एकः</u> नदी बहति।

(ग) अहं ह्यः दिल्लीनगरं <u>गमिष्यामि</u>।

## खण्ड 'घ' (पठित अवबोधनम्)

14. अधोलिखितं गद्यांशं पठित्वा तत् आधारितान् प्रश्नान् उत्तरत–

''बहून्यपत्यानि मे सन्तीति सत्यम्। तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बलः। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बल सुते मातुः अभ्यधिका कृपा सहजैव'' इति। सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्याति हृदयमद्रवत्। स च तामेवमसान्त्वयत्– ''गच्छ वत्से। सर्वं भद्रं जायेत।''

(क) एकपदेन उत्तरत – 1

(i) मातुः अभ्यधिका कृपा कुत्र भवति?

(ख) पूर्णवाक्येन उत्तरत – 1x2=2

(i) इन्द्रेण सुरभिं कथम् असान्त्वयत्?

(ii) ''गच्छ वत्से! सर्वं भद्रं जायेत्।'' इति केन उक्तम्?

(ग) निर्देशानुसारम् उत्तरत – 1x2=2

(i) ''बहून्यपत्यानि मे सन्तीति सत्यम्।'' अत्र प्रयुक्तं क्रियापदं किम्?

(ii) 'भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्।' अत्र विशेष्यपदं किम्?

15. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत–

आश्वास्य पर्वतकुलं तपनोष्णतप्त–

मुद्दामदावविधुराणि च काननानि।

नानानदीनदशतानि च पूरयित्वा,

रिक्तोऽसि यज्जलद! सैव तवोत्तमा श्रीः।।

(क) एकपदेन उत्तरत – 1

(i) काननानि कीदृशानि?

(ख) पूर्णवाक्येन उत्तरत – 1x2=2

(i) जलदस्य श्रीः कदा भवति?

(ii) पद्ये 'रिक्तोऽसि यज्जलद!' इति कथनेन कस्य गुणस्य सन्देशः प्रदत्तः?

(ग) निर्देशानुसारम् उत्तरत – 1x2=2

(i) 'वनानि' अस्य पर्यायपदं किमत्र प्रयुक्तम्?

(ii) 'पर्वतकुलम्' अस्य विशेषणपदं किम् अस्ति?

16. अधोलिखितं नाट्यांश पठित्वा प्रश्नान् उत्तरत–

मयूरः – अरे वानर! तूष्णीं भव। कथं तव योग्यः वनराजपदाय? पश्यतु पश्यतु मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एवाहं पक्षिराजः कृतः अतः वने निवसन्तं माम् वनराजरूपेणापि द्रष्टुं सज्जाः भवन्तु अधुना यतः कथं कोऽप्यन्यः विधातुः निर्णयम् अन्यथाकर्तुं क्षमः।

काकः – (सव्यङ्ग्यम्) अरे अहिभुक्। नृत्यातिरिक्तं का तव विशेषता यत् त्वां वनराजपदाय योग्यं मन्यामहे वयम्।

मयूरः – यतः मम नृत्यं तु प्रकृतेः आराधना। पश्य! पश्य! मम पिच्छानामपूर्णं सौंदर्यम्

(पिच्छानुद्घाट्य नृत्यमुद्रायां स्थितः सन्) न कोऽपि त्रैलोक्ये मत्सदृशः सुन्दरः। वन्यजन्तूनामुपरि आक्रमणं कर्तारं तु अहं स्वसौन्दर्येण नृत्येन च आकर्षितं कृत्वा वनात् बहिष्करिष्यामि। अतः अहमेव योग्यः वनराजपदाय।

(क) एकपदेन उत्तरत – 1

(i) शिरसि शिखा किमिव दृश्यते?

(ख) पूर्णवाक्येन उत्तरत – 1x2=2

(i) मयूरस्य केषां सौन्दर्यम् अपूर्वम् अस्ति?

(ii) मयूरः आक्रमणकर्तारं कथं वनात् बहिष्करिष्यति?

(ग) निर्देशानुसारम् उत्तरत – 1x2=2

(i) 'अतः अहमेव योग्यः वनराजपदाय।' अत्र 'अहम्' कस्मै प्रयुक्तम्?

(ii) 'मयूरः' अस्य समानार्थी पदं गद्यांशात् चिनुत।

17. अधोलिखितयोः श्लोकयोः भावार्थं उपयुक्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखत– $\frac{1}{2}$x4=2

(क) अपत्येषु च सर्वेषु जननी तुल्यवत्सला।

पुत्रे दीने तु सां माता कृपार्द्रहृदया भवेत्।।

भावार्थः –

सर्वेषु च ...... जननी ...... एव भवति। ...... पुत्रे तु सा एव ........ कृपार्द्रहृदया भवेत्।

(ख) दुष्कराण्यपि कर्माणि मतिवैभवशालिनः। $\frac{1}{2}$x4=2

नीतिं युक्तिं समालम्ब्य लीलयैव प्रकुर्वते।।

भावार्थः–

............. दुष्कराणि कर्माणि अपि ......युक्तिं च समालम्ब्य ...... एव .....।

18. अधोलिखितयोः श्लोकयोः अन्वयं पूरयित्वा उत्तरपुस्तिंकायां लिखत– $\frac{1}{2}$x2=1

(क) य इच्छत्यामनः श्रेयः प्रभूतानि सुखानि च।

न कुर्यादहितं कर्म स परेभ्यः कदापि च।।

अन्वयः–

यः ....... श्रेयं प्रभूतानि सुखानि च इच्छति। सः कदापि च परेभ्यः ..... कर्म न कुर्यात्।

(ख) एकेन राजहंसेन या शोभा सरसो भवेत्। $\frac{1}{2}$x2=1

न सा बकसहस्रेण परितस्तीरवासिना।।

अन्वयः –

एकेन राजहंसेन ..... या शोभा भवेत्। ...... तीरवासिना बकसहस्रेण सा (शोभा) न भवति।

19. रेखाङ्किततयपदमाधृत्य प्रश्ननिर्माणं कृत्वा उत्तरपुस्तिकायां लिखत– $\frac{1}{2}$x4=2

(क) प्रकृत्याः सन्निधौ वास्तविकं सुखं विद्यते।

(ख) सुराधिपः ताम् अपृच्छत्।

(ग) तत्त्वार्थस्य निर्णयः विवेकेन कर्तुं शक्यः।

(घ) एताहशी भयावहघटना गढवालक्षेत्रे घटिता।

20. अधोलिखितानि वाक्यानि घटनाक्रमेण संयोज्य पुनः उत्तरपुस्तिकायां लिखत– $\frac{1}{2}$x6=3

(i) व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।

(ii) गलबद्धश्रृगालकः व्याघ्रः पुनः पलायितः।

(iii) जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्।

(iv) मार्गे सा एकं व्याघ्रम् अपश्यत्।

(v) व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच–अधुना एकमेव व्याघ्रं विभज्य भुज्यताम्।

(vi) बुद्धिमती पुत्रद्वयेन उपेता पितुर्गहं प्रति चालिता।

21. अधोलिखितानां शब्दार्थानां सुमेलनं कृत्वा उत्तरपुस्तिकायां लिखत– $\frac{1}{2}$x4=2

| स्तम्भ 'क' | स्तम्भ 'ख' |
|---|---|
| बलीवर्दः | वृषभः |
| सहस्रदीधितिः | नेत्राभ्याम् |
| चक्षुभ्याम् | असत्यम् |
| अनृतम् | सूर्यः |

********